CBSE Class 12 Sanskrit Core 2013 - 22/1

Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

Time Allowed: 3 Hours **Maximum Marks: 100**

General Instructions

(i) अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति।

(ii) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

(iii) उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।

(iv) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(v) खण्ड क — 10 अङ्काः; खण्ड ख — 15 अङ्काः; खण्ड ग — 30 अङ्काः।

(vi) खण्ड घ — पठितांश-अवबोधनम् 35 अङ्काः; सामान्यः संस्कृतसाहित्यपरिचयः 10 अङ्काः।

Section खण्ड क — अपठितांश-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

सेवायाः अयम् एव अभिप्रायः यद् मानवः सम्यक् परस्परं साहाय्यं कुर्यात्। सर्वो हि विविधरूपेण क्षम:। स्वक्षमतया परेभ्यः सहयोगप्रदानं हि जीवनस्य सार्थक्यं भवति। सेवा भवति द्विविधा - पारमार्थिकी लौकिकी च। पारमार्थिकसेवया महात्मानः जनेभ्यः ज्ञानं यच्छन्ति। तेषां दोषनिवारणार्थं, पारस्परिकं वैमनस्यं च दूरीकर्तुं प्रयतन्ते। सांसारिकसम्बन्धेषु लौकिकसेवाया अपि महत्त्वम् अस्ति। एकस्य असहायस्य सेवा लौकिकी-सेवा भवति। अनया समाजे शोभनाः सम्बन्धाः जायन्ते। जनानां समस्यानां समाधानम् अपि भवति। जनाः सदैव एतदेव चिन्तयन्तु यद् यावद् वयं स्वस्थाः, सक्षमाः, तावद् अस्माकं स्वस्थता सक्षमता एव परेषां सेवायां तत्परा भवेत्।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) 'मानवः साहाय्यं कुर्यात्' अयं कस्याः अभिप्रायः? (ii) महात्मानः जनेभ्यः किं यच्छन्ति? (iii) सांसारिकसम्बन्धेषु कस्याः महत्त्वम् अस्ति? (iv) असहायस्य सहायता का भवति?

(ब) पूर्णवाक्येन उत्तरत - (i) महात्मानः जनानां किं कर्तुं प्रयतन्ते? (ii) जनाः सदैव किं चिन्तयन्तु?

(स) यथानिर्देशम् उत्तरत - (i) 'अनया समाजे सम्बन्धा जायन्ते' अत्र 'अनया' इति सर्वनामपदं कस्मै प्रयुक्तम्? (ii) 'अक्षम्' अस्य किं विलोमपदम्? (iii) 'चिन्तयन्तु' क्रियायाः कर्तृपदं किम्? (iv) 'संलग्ना' अस्याः कः पर्यायः?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।

Section खण्ड ख — संस्कृतेन रचनात्मककार्यम्

2. भवान् पीयूषः। भवतः सखा रजनीशः जलौघे निमज्जन्तम् एकं बालम् अरक्षत्। तं वर्धापयितुं लिखिते पत्रे मञ्जूषाया रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत।

पत्रम्

केन्द्रियविद्यालयः, सैनिकविहारः, नवदिल्लीतः।

दिनांकः: .....

प्रिय सखे! _____ (i)

सस्नेहं नमस्काराः।

बहुकालाद् जानामि अहं यद् _____ (ii) आबाल्यकाद् विद्यालये _____ (iii) सन्तरणस्य अभ्यासम् अकरोत्। _____ (iv) च प्रथमं स्थानं लब्धवान्। परमहं यदा _____ (v) अपठम् यद् भवान् टौंकमण्डले जलप्रवाहे _____ (vi) बालं जलाद् बहिः निर्गमय्य तस्य प्राणान् अरक्षत्, तदा न केवलं प्रसन्नोऽहं परं _____ (vii) भूरि मनसि प्राशंसयम्। एतदर्थं बहु वर्धापयामि त्वाम्। जीवने सदैव एतादृशानि कार्याणि _____ (viii) शतं जीवतु भवान्। एतदर्थं तव पितृभ्याम् अपि _____ (ix) प्रयच्छामि। भगिन्यै मम आशिषः।

_____ (x) सखा, पीयूषः।

मञ्जूषा: 1. तरणताले 2. वर्धापनम् 3. त्वाम् 4. रजनीश! 5. निमज्जन्तम् 6. कुर्वन् 7. समाचारपत्रे 8. भवान् 9. तरणप्रतियोगितायाम् 10. भवतः।

3. मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत -

एकदा देवराज इन्द्रः इन्द्रसभायां देवैः सह पृथिव्याः विषये (i) _____ अकरोत्। सर्वे देवा पृथिव्याः (ii) _____ जीवनमूल्यानि च अवर्णयन्। इन्द्रोऽवदत् - 'अहं पृथिव्याः (iii) _____ जीवनसमस्याः ज्ञात्वा (iv) _____ दूरीकरिष्यामि।' देवाः अवदन् यद् धरायाः निवासिनः कुरूपान् (v) _____ दृष्ट्वा व्यग्राः भवन्ति। इन्द्रेण तेषां कुरूपाणां स्वरूपं परिवर्तितुं देवाः आदिष्टाः। भूमिवास्तव्याः सर्वान् असुन्दरान् पदार्थान् सुन्दरान् (vi) _____ अकारयन्। इन्द्रः अधोषयत् - 'द्रष्टव्यं तावत् कोऽपि अनया सुविधया (vii) _____ तु नास्ति।' तदा देवैः ज्ञातम् - एकः साधुः स्वकुट्यां किमपि (viii) _____ न अकारयत्। पृष्टे सति साधुः अब्रवीत् 'मानवजीवनाद् अन्यत् नास्ति किमपि (ix) _____? आत्मतोषात् नापि श्रेयान् कोऽपि (x) _____।' साधोः वचनानि श्रुत्वा देवाः बहु प्रासीदन्, तस्य आन्तरिकं सौन्दर्यं च भूयोभूयः प्रशंसन्।

मञ्जूषा: 1. सुन्दरम् 2. विचारम् 3. पुनः 4. आनन्दः 5. पदार्थान् 6. समस्या 7. वञ्चित 8. परिवर्तनम् 9. ताः 10. सर्वाः।

4. मञ्जूषायां लिखितपदानां सहायतया पञ्चसंस्कृतवाक्येषु 'विद्यादानस्य महत्त्वम्' इति विषयम् अधिकृत्य वर्णनं कुरुत -

मञ्जूषा: अज्ञानस्य निराकरणम्, वञ्चनाया अभावः, समाजरक्षा, साक्षरतायाः प्रसारः, उचितमूल्येन क्रयणम्, धनलाभः, वस्तूनाम् उपयोगीकरणम्, स्वास्थ्यरक्षा, परोपकारः, जीवनस्य महत्त्वम्।

Section खण्ड ग — अनुप्रयुक्तव्याकरणम्

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत -

(i) जलस्यान्तर्बहिः क्रमात्।
(ii) लोभश्चेद् अगुणेन किम्?
(iii) अद्य ममोपवासः अस्ति।
(iv) तदलं भवतः सन्तापेन।
(v) कच्चिद् जनं निमन्त्रयितुम्।
(vi) समाचारस्त्वन्तरिक्षे।

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहाः लेख्याः -

(i) प्रत्युत्पन्नमतिः अवदत्।
(ii) इदानीं दुर्गसंस्कारः प्रारब्धव्यः।
(iii) सद्विद्या यदि किं धनैः?
(iv) शिक्षा क्षयं गच्छति कालपर्ययात्।
(v) अशक्तैः बलिनः शत्रोः कर्तव्यं प्रपलायनम्।
(vi) सर्वे कक्षायां यथास्थानम् उपविशन्ति।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत-प्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत -

(i) _____ तर्हि वयम् आहूताः। (उप+आ+लभ्+तुमुन्)
(ii) बालुका _____ भूमिम् आवृणोति। (उत्+डी+क्त्वा)
(iii) मठेषु _____ लेखाः। (उत्+कृ+क्त)
(iv) सत्येन पन्था _____ देवयानः। (वि+तन्+क्त)
(v) अस्माकम् _____ आधारः कः? (प्र+शंस्+अनीयर्)
(vi) नायकः _____ अस्ति। (रूप+मतुप्)
(vii) छात्राः मम _____ लद्दाखं गताः। (संरक्षक+त्व)
(viii) अभियानम् _____ आसीत्। (साहस+ठक्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् -

(i) एतादृशैः जनैः राजा तृणवद् गण्यते/गण्यन्ते।
(ii) अस्माभिः ह्रदः अन्वेषितम्/अन्वेषितः।
(iii) व्रजन्ति ते/तौ मूढधियः पराभवम्।
(iv) अयमेव अहोरात्रं जनयतः/जनयति।
(v) शरस्तम्बस्य अङ्कुरात् अङ्कुराः निस्सरन्ति/निस्सरतः।

OR

8. अधोलिखितेषु वाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणपदानि योजयत -

(i) _____ मत्स्यजीविभिः उक्तम्।
(ii) अयमेव वत्सरं _____ भागेषु विभनक्ति।
(iii) अहम् _____ कुसुमपुरं द्रष्टुम् इच्छामि।
(iv) विपदि _____ मानवाः प्रेरणां कुर्वन्ति।
(v) _____ गिरयः अतीव शोभन्ते।

मञ्जूषा: द्वादशसु, धवलाः, गच्छद्भिः, अतिरमणीयम्, निपतिताः।

9. अधोलिखितेषु वाक्येषु कोष्ठकप्रदत्तशब्दैः सह उपयुक्तां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत -

(i) यथा (चतुर) _____ कनकं परीक्ष्यते।
(ii) सदा (अनुकूल) _____ हि कुर्वते रतिम्।
(iii) सूत्रधार: (गेह) _____ गत्वा ज्ञातुमिच्छति।
(iv) (हित) _____ न यः संशृणुते स किं प्रभुः?
(v) मानवः (स्वभाव) _____ एव उत्सवप्रियः।

Section खण्ड घ — पठितांश-अवबोधनम्

10. अधोलिखितं पद्यं, गद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -

(क) पद्यम्:
स किं सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः।
सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) किंप्रभुः किं न संशृणुते? (ii) काः रतिं कुर्वते?

(ब) पूर्णवाक्येन उत्तरत - सर्वसम्पदः कदा रतिं कुर्वते?

(स) यथानिर्देशम् उत्तरत - (i) 'अनुचितम्' अस्य किं विलोमपदम्? (ii) 'मन्त्री' अस्य कः पर्यायः? (iii) 'यः' अस्य क्रियापदं किम्? (iv) 'सः' इति सर्वनाम कस्य विशेषणम्?

(ख) गद्यांशः:
यूयं सर्वे दिल्लीस्थलौहस्तम्भेन परिचिताः एव। कोऽपि न अद्य यावत् जानाति कथं सः स्तम्भः विकृतिं बिना तथैव तिष्ठति। अन्ये विस्मयकराः स्तम्भाः सन्ति - अहमदनगरे कम्पमानाः स्तम्भाः, सुचिन्दरं देवालये स्थिताः सङ्गीतमयाः स्तम्भाः, गोलकुण्डादुर्गे प्रतिध्वन्यात्मकाः स्तम्भाः, फतेहपुरसीकरीमध्ये स्थिताः ध्वनिवाहकाः स्तम्भाः। अद्य यावत् दिग्दिगन्तेषु अस्माकं भारतीयवैज्ञानिकानां गौरवगाथां वर्णयन्ति।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) सर्वे केन परिचिताः? (ii) फतेहपुरसीकर्यां स्तम्भा: कीदृशा:?

10. (continued)

(ब) पूर्णवाक्येन उत्तरत - विस्मयकराः स्तम्भाः के के सन्ति?

(स) यथानिर्देशम् उत्तरत - (i) 'स स्तम्भः विकृतिं विना तिष्ठति' अत्र 'स' इति सर्वनामपदं कस्मै प्रयुक्तम्? (ii) 'कोऽपि' अस्य क्रियापदं किम्? (iii) 'तावत्' अस्य विलोमपदं किम्? (iv) 'अस्मिन् दिने' अस्य कः पर्यायः?

(ग) नाट्यांशः:
चारुदत्तः - (दीर्घं निःश्वस्य) भोः! दारिद्र्यं नाम मनस्विनः पुरुषस्य सोच्छ्वासं मरणम्।
विदूषकः - अलम् इदानीं भवान् अतिमात्रं सन्तप्तुम्। दानेन विपन्नविभवस्य बहुलपक्षस्य चन्द्रस्य ज्योत्स्नापरिक्षय इव भवतः रमणीयोऽयं दरिद्रभावः।
चारुदत्तः - न खल्वहं नष्टां श्रियमनुशोचामि। गुणरसज्ञस्य तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) मरणं किम्? (ii) दरिद्रभावः कीदृशः?

(ब) पूर्णवाक्येन उत्तरत - चारुदत्तस्य दरिद्रभावः कस्य इव रमणीयः?

(स) यथानिर्देशम् उत्तरत - (i) 'मनस्विनः' अस्य किं विशेष्यम्? (ii) 'कोमलतरम्' अस्य विलोमपदं किम्? (iii) 'व्यसनम्' अस्य का क्रिया? (iv) 'चन्द्रिकायाः' अस्य कः पर्यायः?

11. यथानिर्देशं प्रश्नौ उत्तरत -

(i) 'दारिद्र्ये दुर्लभं सत्त्वम्' अस्मिन् पाठे कस्य वर्णनम् अस्ति?

(ii) 'एष बौद्धधर्मस्य प्रसिद्धः प्राचीनश्च श्वेतस्तूपः।' इति वाक्यं का कां कथयति?

12. प्रत्येकम् अंशस्य प्रदत्तभावार्थत्रयात् शुद्धभावार्थं चित्वा लिखत -

(अ) पिशुनता यद्यस्ति किं पातकैः?
भावार्थाः: (i) जनः कस्यापि अवगुणं न चिन्तयेत्। (ii) यदि मानवः परस्य छिद्रान् अन्यं सूचयति तर्हि पापी एव भवति। (iii) संसारे परस्य दोषान् दृष्ट्वा न निन्देत्।

(ब) सर्वत्र निरुद्धचेष्टस्य राज्ञः राज्यं बन्धनम् एव।
भावार्थाः: (i) राजा स्वच्छन्दं विहरति तदैव सुखी। (ii) यदि मन्त्रिणः एव शासनं कुर्वन्ति तर्हि राजा किम्? (iii) यदि राजानं मन्त्रिणः अवरुन्धन्ति तर्हि राजा राज्यं त्यजेत्।

OR

OR

12. अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषापदैः पूरयित्वा पुनः लिखत -

विद्यमाना गतिर्येषामन्यत्रापि सुखावहा। ते न पश्यन्ति विद्वांसो देहभङ्गं कुलक्षयम्।।

भावार्थः: संसारे ये जनाः स्वकीयैः सत्कार्यैः सदैव (i) _____ उपकारं कुर्वन्ति (ii) _____ सद्गुणैः सर्वत्र (iii) _____ लभन्ते ते अस्माद् (iv) _____ न गच्छन्ति परलोकम्। ते तु सर्वदैव भवन्ति अमराः अत्र परत्र च।

मञ्जूषा: लोकाद्, परेषाम्, सम्मानम्, स्वीयैः।

13. अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत -

(i) पद्यम्: यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।
अन्वयः: यः तु (i) _____ एव सर्वाणि (ii) _____ अनुपश्यति, (iii) _____ च सर्वभूतेषु ततः न (iv) _____।

(ii) पद्यम्: निर्वैराः विमुखीभवन्ति सुहृदः स्फीता भवन्त्यापदः। पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते।।
अन्वयः: निर्वैराः (i) _____ विमुखीभवन्ति, आपदः (ii) _____ भवन्ति। यत् पापम् (iii) _____ परैः अपि कृतं तत् (iv) _____ सम्भाव्यते।

मञ्जूषा: 1. सुहृदः, 2. आत्मानम्, 3. कर्म, 4. भूतानि, 5. तस्य, 6. स्फीताः, 7. आत्मनि, 8. विजुगुप्सते।

14. अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुनः लिखत -

क: (i) वृषल! किम् अस्थाने (ii) मठानां विशालता भव्यता च (iii) सुमहिमा यद्यस्ति (iv) अलम् इदानीं भवान्

ख: (i) प्रेक्षकान् प्रसभम् आकर्षत:। (ii) अतिमात्रं सन्तप्तुम्। (iii) महान् प्रजाधनापव्ययः। (iv) किं मण्डनैः?

15. अधोलिखितवाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत -

(अ) <u>परमेष्ठिनः</u> परार्द्ध संख्या। (i) ब्रह्मणः (ii) विष्णोः (iii) शिवस्य।

(ब) अस्मान् <u>अभियोक्तुम्</u> उद्यतः। (i) जेतुम् (ii) आक्रान्तुम् (iii) उपहसितुम्।

(स) <u>इन्दोः</u> किरणेषु इव। (i) सूर्यस्य (ii) दिनस्य (iii) चन्द्रमसः।

(द) <u>मुहूर्त्तकं</u> परिपालयतु। (i) नितान्तम् (ii) क्षणं यावत् (iii) रात्रिपर्यन्तम्।

Section खण्ड घ — सामान्यः संस्कृतसाहित्यपरिचयः

16-अ. अधोलिखितेषु कस्यापि एकस्य कवेः संस्कृतेन संक्षिप्तः परिचयो देयः - अम्बिकादत्तव्यासः, भासः, भर्तृहरिः।

अथवा (OR)

OR

16-अ. अधोलिखितवाक्येषु मञ्जूषापदैः रिक्तस्थानपूर्तिं कुरुत -

(i) छन्दोरहिता रचना _____ कथ्यते।
(ii) नाटकेषु सर्वश्राव्यं _____ अभिधीयते।
(iii) नाटकस्य अन्ते _____ भवति।
(iv) खण्डकाव्ये अधिकतमाः _____ सर्गाः भवन्ति।
(v) पद्यकाव्यं _____ भेदयोः विभक्तं भवति।
(vi) _____ रूपकस्य भेदः भवति।
(vii) रसाः _____ भवन्ति।
(viii) _____ कथायाः सूचना दीयते।
(ix) गद्यपद्यमयं काव्यं _____ भवति।
(x) नीतिशतकम् _____ भवति।

मञ्जूषा: 1. भरतवाक्यम् 2. मुक्तककाव्यम् 3. नव 4. द्वयोः 5. प्रकाशम् 6. अष्टौ 7. सूत्रधारेण 8. गद्यम् 9. चम्पूः 10. नाटकम्।

16-ब. (ब) नाट्यसाहित्यस्य का अपि पञ्च विशेषताः संस्कृतेन लिखत। Write any five characteristics of Drama literature in Sanskrit.

- End of Question Paper -